# Shri Lalitambaparameshvarastutih

# श्रीललिताम्बापरमेश्वरस्तुतिः

## Document Information

Text title : lalitAmbAparameshvarastutiH

File name : lalitAmbAparameshvarastutiH.itx

Category : devii, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, devI, shiva, dashamahAvidyA, lalitA, panchadashI

Location : doc_devii

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : December 27, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# श्रीललिताम्बापरमेश्वरस्तुतिः

श्रीगणेशाय नमः ।
ॐ क ए ई ल ह्रीं ह स क ह ल ह्रीं स क ल ह्रीं श्रीं ।
कल्याणशैलधन्वा करधृतकुम्भाक्षमालिकामुद्रः ।
कलयतु मम सन्तोषं करिचर्मधरः कृपापयोराशिः ॥ १॥

एकात्मकत्वधिषणामेधयतीमीशजीवयोर्नमताम् ।
एकान्तवासलभ्यामेकां पुण्यावलिं नुमः शम्भोः ॥ २॥

ईशोऽर्धवपुर्यस्या ईप्सितपङ्क्तिर्यदङ्घ्रिनतसुलभा ।
ईकाररूपिणीं तामीश्वरपत्नीं हृदा सदा कलये ॥ ३॥

लभ्यन्तेऽखिलविभवा लब्धावसरैर्यदीयमन्त्रजपे ।
लक्ष्मीगीर्विनुता सा लक्ष्या भूयान्मदीयचित्तस्य ॥ ४॥

ह्रीङ्कारपद्मभृङ्गौ ह्रीङ्कारावृत्तिशीलनरसुलभौ ।
ह्रीङ्कारगिरिमृगेन्द्रौ ह्रीङ्कारेणैव भावयामि शिवौ ॥ ५॥

हरतादाशु जडत्वं हरिदधिपाराध्यपादपाथोजः ।
हरिणाङ्ककलितचूडो हृतवर्ष्मार्धः कुलाद्रिकन्यकया ॥ ६॥

सत्यं ज्ञानमितीमे सकलाम्नाया वदन्ति यद्रूपम् ।
सद्गुरुमुखैकवेद्यां सन्मतिदां नौमि तां परामनिशम् ॥ ७॥

कर्मभिरात्मानुगणैः कलितामलभावचित्तकञ्जातैः ।
कतिपयपुरुषवरेण्यैः कथमपि बुद्धं नमामि शशिमौलिम् ॥ ८॥

हतरिपुवर्गैः शान्तैर्हरिहयपद्मोद्भवादिपदविमुखैः ।
हंसकरैः परमाद्यैर्हस्ताम्बुजपूजितं नमामि हरम् ॥ ९॥

ललितां कवित्वसरणिं लभते मूकोऽपि यत्कृपालेशात् ।
लङ्केशाहितविनुतां लम्बोदरमातरं नमस्यामि ॥ १०॥

ह्रीङ्कारगेहगृहिणौ ह्रीङ्कारपयःपयोधिकल्पतरू ।
ह्रीङ्कारवनमयूरौ ह्रीङ्कारशरीरिणौ शिवौ वन्दे ॥ ११॥

सम्यङ्निरुध्य चेतः सकलानि निगृह्य करणानि ।
सततं यतिभिर्हृदये समाधिभाव्यां नमामि ललिताम्बाम् ॥ १२॥

कणभुक्कपिलाराध्यः कथिताधिकसौख्यदानकृतदीक्षः ।
करविधृतहरिणबालः कलाभिवृद्ध्यै ममास्तु परमेशः ॥ १३॥

ललनाभिस्त्रिदशानां ललितैर्गीतैः स्तुतात्मचारित्राम् ।
लसदलकभालदेशां लभ्यां योगैर्नमामि जगदम्बाम् ॥ १४॥

ह्रीङ्कारसौधराजौ ह्रीङ्काराम्भोधिपूर्णसितकिरणौ ।
ह्रीङ्कारवाच्यरूपौ ह्रीन्निष्कुटकोकिलौ शिवौ कलये ॥ १५॥

(श्रीं) आदौ यन्मनुवर्णैर्घटिता रचिता स्तुतिर्येयम् ।
सा ललिता तामूरीकुर्यादव्याजकरुणाङ्गी ॥ १६॥

इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचिता श्रीललिताम्बापरमेश्वरस्तुतिः सम्पूर्णा ।

Proofread by PSA Easwaran

*Shri Lalitambaparameshvarastutih*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*